दिनाङ्क :- 14.07.2025

प्रात: - 06:55

राष्ट्रपति-ओडिशा

राष्ट्रपतिपदासीना द्रौपदी-मुर्मूः अद्यारभ्य ओडिशायाः द्विदिवसीय-यात्रायां भविष्यति। राष्ट्रपतिः सायं भुवनेश्वरनगरस्य बीजुपटनायक-अन्तर्राष्ट्रीय-विमानस्थानकं आगमिष्यति, यतः सा अखिलभारतीय-चिकित्सा-विज्ञानसंस्थानं भुवनेश्वरं गत्वा तस्य पञ्चमस्य दीक्षांतसमारोहस्य शोभां वर्धयिष्यति। श्वः राष्ट्रपतिः मुर्मूः रेवेन्शॉ विश्वविद्यालयस्य त्रयोदश-तमे वार्षिकदीक्षांतसमारोहे भागं गृहष्यति तथा च कटकनगरस्य रेवेन्शॉ बालिका उच्चविद्यालयस्य त्रयाणां भवनानां पुनर्विकासस्य आधारशिलां स्थापयिष्यति। राष्ट्रपतिः कटकनगरे आदिकवि-सरलादासस्य जन्मदिवसस्य अवसरे चतुर्विंशत्युत्तर-द्विसहस्रतम-वर्षस्य कलिंग-रत्नपुरस्कारस्य प्रदानमपि करिष्यति ।

जयशंकर चीना ::

विदेशमन्त्री एस जयशंकरः अद्य आरभ्य चीनदेशस्य द्विदिवसीययात्रायां भविष्यति। विदेशमन्त्री श्वः तियानजिन्-नगरे एस्.सी.ओ. इति शङ्घाई-सहकार-सङ्घटनस्य विदेशमन्त्रिणां सभायां भागं गृहीष्यति । विदेशमन्त्रिणः विभिन्नक्षेत्रेषु एस.सी.ओ. सहकार्यस्य प्रमुखेषु अन्ताराष्ट्रिय-क्षेत्रीय-विषयेषु च विचाराणां आदानप्रदानं करिष्यन्ति। एस.सी.ओ. समूहे भारतम्, चीना, रशिया, इरान्, कजाकिस्तान, किर्गिस्तान, पाकिस्तान, ताजिकिस्तान, उज्बेकिस्तान, बेलारूस् चेति दश सदस्यदेशाः सन्ति । चीनदेशः एस.सी.ओ-सङ्घस्य वर्तमानः अध्यक्षः अस्ति । डॉ. जयशंकरः एस.सी.ओ विदेशमन्त्रिणां सभाया सह द्विपक्षीयसभाः अपि करिष्यति। डॉ जयशंकरः चीनदेशस्य भ्रमणकाले चीनदेशस्य समकक्षं वाङ्ग यी इत्यनेन सह मिलितुं शक्नोति । द्विपक्षीयसम्बन्धानां सामान्यीकरणाय भारतचीनयोः दीर्घकालीन-सीमाविवादस्य निवारणाय च द्वयोः मध्ये चर्चा बहुमहत्त्वपूर्णा भविष्यतीति अपेक्षा वर्तते।

अन्तरिक्षयात्री

भारतीय-अन्तरिक्षयात्री-समूहस्य दलनायकः शुभांशु-शुक्लस्य अपि च एक्सिओम्-4-मिशन इत्यस्य अन्ये त्रयः चालकदलस्य सदस्यानां पृथिवी-प्रत्यावर्तन-यात्रा अद्य आरभ्यते । केन्द्रीय विज्ञान एवं प्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः सोशल मीडिया सन्देशे अवदत्, यत् अद्य भारतीयमानकसमयानुसारं सायं सार्ध चतुर्वादने अनडॉकिंग निर्धारितम्

अस्ति, यद्धि चालकदलं प्रायः सायं त्रिवादने पृथिव्यां आगमिष्यति । दलनायकः श्रीशुक्लः अन्ताराष्ट्रिय-अन्तरिक्ष-स्थानकं प्रति चतुर्दश दिवसीयाभियाने आसीत्। यात्रायाः कालखण्डे दलनायकः श्रीशुक्लः सप्त इण्डो-स्पेसिफिक् प्रयोगान् अकरोत्। उत्तरप्रदेशस्य लखनऊनगरे वार्ताहरैः सह भाषणं कुर्वन् शुभांशु शुक्लस्य पिता शम्भूदयालः अवदत् यत्, ते ईश्वरं प्रार्थयन्ति यत् सः सुरक्षितरूपेण आगच्छेत् ।

<u>केन्द्रीयकृषि-मन्त्री</u>

केन्द्रेण राज्येभ्यः केन्द्रशासित-प्रदेशेभ्यः च अमानक-उर्वरकाणां विषये तत्कालं कठोर-क्रियान्वयनं कर्तुं निर्देशः दत्तः अस्ति। केन्द्रीयकृषि-कल्याणमन्त्री शिवराजसिंहचौहानः सर्वेषां राज्यानां केन्द्रशासित-प्रदेशानां च मुख्यमन्त्रिभ्यः पत्रं लिखितवान् । अवधेयं यत् - देशे सर्वत्र फेक्-फर्टिलाइसर् इति औपधिक-उर्वरकस्य विक्रयणं, अनुदानितस्य उर्वरकस्य कृष्णविपणनं, बलात् टैगिंग्, इत्यादीनां अवैधकार्याणां निवारणं कर्तुं उद्देश्यं कृत्वा एतत् पत्रं लिखितम् अस्ति। श्री-शिवराजसिंहचौहाणः अवदत् यत् कृषिः भारतस्य अर्थव्यवस्थायाः मेरुदण्डः अस्ति तथा च कृषकाणां आयस्य स्थिरतां सुनिश्चित्य तेभ्यः समीचीनसमये, समुचित-मूल्ये च गुणवत्तापूर्णानाम् उर्वरकाणां प्रदानं अत्यावश्यकम्।

<u>राजनाथः</u>

केन्द्रीय-रक्षामन्त्री राजनाथसिंहः अवदत् यत् सिन्दूराभियानाधौ ब्रह्मोस क्षेपणास्त्रस्य प्रदर्शनं उल्लेखनीयम् आसीत्। सिन्दूराभियानस्य अनन्तरं विदेशेषु अपि ब्रह्मोस्-क्षेपणास्त्रस्य आवश्यकता वर्धितास्ति।

स्व-संसदीयक्षेत्रस्य लखनऊ-नगरस्य द्विदिवसीय-यात्रायाः द्वितीयदिने ह्यः राजकीय-स्नातकोत्तर महाविद्यालये उत्तरप्रदेशस्य पूर्वमुख्यमन्त्रिणः चन्द्रभानुगुप्ता इत्यस्य प्रतिमायाः अनावरणं कुर्वन् रक्षामन्त्री अवदत् यत् चतुर्दश-देशैः ब्राहमोस्-क्षेपणास्त्राणि याचितानि सन्ति, तस्य निर्यातः लखनऊ-नगरात् अपि भविष्यति। एतेन राज्ये उद्योग-अवसरणां सംवर्धने साहाय्यं भविष्यति।

<u>नीति/आयोग/ यूपीआई</u>

नीति आयोगस्य पूर्व-सी.ई.ओ अमिताभकान्तः यूपीआई इत्यस्य प्रशंसाम् अकरोत् यत् सः विश्वस्य प्रमुखः वास्तविक-समय-मुद्राविनिमय-प्रणाली अभवत्। सः उक्तवान् यत्

प्रधानमन्त्रिणः नरेन्द्रमोदीसर्वकारस्य एषा एका उल्लेखनीया उपलब्धिः अभवत्। अनेन नागरिकानां जीवने परिवर्तनं जातम् ।

विम्बलडन् ::

टेनिस्-क्रीडायां विश्वस्य प्रथमक्रमाङ्कस्य जन्निक-सिनर्-इत्यनेन गतरात्रौ लण्डन्-नगरस्य ऑल्-इङ्ग्लैण्ड्-क्लब्-क्रीडायांप्रथमवारं विम्बल्डन्-विंशति-पंचविंशति-उपाधिः प्राप्ता ।